॥ वाल्मीकि रामायण ॥

तद्द्रुमाणां शिलानां च वर्षं प्राणहरं महत् ।
प्रतिजग्राह धर्मात्मा राघवस्तीक्ष्णसायकैः ॥ १ ॥

प्रतिगृह्य च तद्वरं निमीलित इवर्षभः ।
रामः क्रोधं परं भेजे वधार्थं सर्वरक्षसाम् ॥ २ ॥

ततः क्रोधसमाविष्टः प्रदीप्त इव तेजसा ।
शरैरभ्यकिरत्सैन्यं सर्वतः सहदूषणम् ॥ ३ ॥

ततः सेनापतिः क्रुद्धो दूषणः शत्रुदूषणः ।
जग्राह गिरिशृङ्गाभं परिघं रोमहर्षणम् ॥ ४ ॥

वेष्टितं काञ्चनैः पट्टैर्देवसैन्याभिमर्दनम् ।
आयसैः शङ्कुभिस्तीक्ष्णैः कीर्णं परवसोक्षिताम् ॥ ५ ॥

वज्राशनिसमस्पर्शं परगोपुरदारणम् ।
तं महोरगसङ्काशं प्रगृह्य परिघं रणे ।
दूषणोऽभ्यपतद्रामं क्रूरकर्मा निशाचरः ॥ ६ ॥

तस्याभिपतमानस्य दूषणस्य स राघवः ।
द्वाभ्यां शराभ्यां चिच्छेद सहस्ताभरणौ भुजौ ॥ ७ ॥

भ्रष्टस्तस्य महाकायः पपात रणमूर्धनि ।
परिघश्छिन्नहस्तस्य शक्रध्वज इवाग्रतः ॥ ८ ॥

स कराभ्यां विकीर्णाभ्यां पपात भुवि दूषणः ।
विषाणाभ्यां विशीर्णाभ्यां मनस्वीव महागजः ॥ ९ ॥

दृष्ट्वा तं पतितं भूमौ दूषणं निहतं रणे ।
साधु साध्विति काकुत्स्थं सर्वभूतान्यपूजयन् ॥ १० ॥

एतस्मिन्नन्तरे क्रुद्धास्त्रयः सेनाग्रयायिनः ।
संहृत्याभ्यद्रवन्रामं मृत्युपाशावपाशिताः ।
महाकपालः स्थूलाक्षः प्रमाथी च महाबलः ॥ ११ ॥

महाकपालो विपुलं शूलमुद्यम्य राक्षसः ।
स्थूलाक्षः पट्टिशं गृह्य प्रमाथी च परश्वधम् ॥ १२ ॥

दृष्ट्वैवापततस्
तीक्ष्णाग्रैः प्रति

महाकपालस्य
असङ्ख्येयैस्तु

स्थूलाक्षस्याक्षि
स पपात हतो

ततः पावकस
जघनशेषं तेज

ते रुक्मपुङ्खा
निजघ्नुस्तानि

रक्षसां तु शत
सहस्रं च सह

तैर्भिन्नवर्माभर
निपेतुः शोणि

तैर्मुक्तकेशैः स
आस्तीर्णा वसु

क्षणेन तु महा
बभूव निरय

चतुर्दश सहस्र
हतान्येकेन रा

तस्य सैन्यस्य
राक्षसस्त्रिशिर

ततस्तु तद्वीम
समीक्ष्य रामे
रथेन रामं म
समाससादेन्द्र

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com